

प्रकाशक

**दर्शन योग महाविद्यालय**

आर्यवन, रोजड, पत्रा. सागपुर, ता. तलोद, जि. साबरकांठा (गुजरात) 383307
दूरभाष : (02770) 287418, 287518, चलभाष : 94094 15011, 94094 15017
Email : darshanoyg@gmail.com, Website : www.darshanyog.org




# ॥ ओ३म् ॥

## प्रथमः समाधिपादः

१. अथ योगानुशासनम् ।

२. योगश्चित्तवृत्तिनिरोधः ।

३. तदा द्रष्टुः स्वरूपेऽवस्थानम् ।

४. वृत्तिसारूप्यमितरत्र ।

५. वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ।

६. प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ।

७. प्रत्यक्षानुमानागमाः प्रमाणानि ।

८. विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ।

९. शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ।

१०. अभावप्रत्ययालम्बना वृत्तिर्निद्रा ।

११. अनुभूतविषयासम्प्रमोषः स्मृतिः ।

१२. अभ्यासवैराग्याभ्यां तन्निरोधः ।

१३. तत्र स्थितौ यत्नोऽभ्यासः ।

१४. स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ।

१५. दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ।



१६. तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम् ।

१७. वितर्कविचारानन्दास्मितारूपानुगमात् सम्प्रज्ञातः ।

१८. विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ।

१९. भवप्रत्ययो विदेहप्रकृतिलयानाम् ।

२०. श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक इतरेषाम् ।

२१. तीव्रसंवेगानामासन्नः ।

२२. मृदुमध्याधिमात्रत्वात् ततोऽपि विशेषः ।

२३. ईश्वरप्रणिधानाद्वा ।



२४. क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।

२५. तत्र निरतिशयं सर्वज्ञबीजम् ।

२६. स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात् ।

२७. तस्य वाचकः प्रणवः ।

२८. तज्जपस्तदर्थभावनम् ।

२९. ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ।

३०. व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्ति दर्शनालब्धभूमि-
कत्वानवस्थितत्वानि चित्तविक्षेपास्तेऽन्तरायाः ।



३१. दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ।

३२. तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ।

३३. मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां
भावनातश्चित्तप्रसादनम् ।

३४. प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ।

३५. विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थिति निबन्धनी ।

३६. विशोका वा ज्योतिष्मती ।

३७. वीतरागविषयं वा चित्तम् ।

३८. स्वप्ननिद्राज्ञानालम्बनं वा ।

३९. यथाभिमतध्यानाद्वा ।

४०. परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ।

४१. क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ।

४२. तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ।

४३. स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ।

४४. एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ।



४५. सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ।

४६. ता एव सबीजः समाधिः ।

४७. निर्विचारवैशारद्येऽध्यात्मप्रसादः ।

४८. ऋतम्भरा तत्र प्रज्ञा ।

४९. श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ।

५०. तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ।

५१. तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः ।

इति प्रथमः समाधिपादः

□ □ □



## द्वितीयः साधनपादः

१. तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ।

२. समाधिभावनार्थः क्लेशतनूकरणार्थश्च ।

३. अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः ।

४. अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ।

५. अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या।

६. दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ।

७. सुखानुशयी रागः ।



८. दुःखानुशयी द्वेषः ।

९. स्वरसवाही विदुषोऽपि तथा रूढोऽभिनिवेशः ।

१०. ते प्रतिप्रसवहेयाः सूक्ष्माः ।

११. ध्यानहेयास्तद्वृत्तयः ।

१२. क्लेशमूलः कर्माशयो दृष्टादृष्टजन्मवेदनीयः।

१३. सति मूले तद्विपाको जात्यायुर्भोगाः ।

१४. ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ।

१५. परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ।

१६. हेयं दुःखमनागतम् ।

१७. द्रष्टृदृश्ययोः संयोगो हेयहेतुः ।

१८. प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्।

१९. विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि ।

२०. द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः।

२१. तदर्थ एव दृश्यस्याऽऽत्मा ।

२२. कृतार्थम्प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्।

२३. स्वस्वामिशक्त्योः स्वरूपोपलब्धि हेतुः संयोगः।



२४. तस्य हेतुरविद्या ।

२५. तदभावात् संयोगाभावो हानं तद्दृशेः कैवल्यम्।

२६. विवेकख्यातिरविप्लवा हानोपायः ।

२७. तस्य सप्तधा प्रान्तभूमिः प्रज्ञा ।

२८. योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेक-ख्यातेः ।

२९.यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि।

३०. अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः ।

३१. जातिदेशकालसमयानवछिन्नाः सार्वभौमा महाव्रतम् ।



३२. शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः।

३३. वितर्कबाधने प्रतिपक्षभावनम् ।

३४. वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानानन्तफला इति प्रतिपक्षभावनम् ।

३५. अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः ।

३६. सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम् ।

३७. अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम् ।

३८. ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः ।

३९. अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः ।



४०. शौचात्स्वाङ्गजुगुप्सा परैरसंसर्गः ।

४१. सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च ।

४२. सन्तोषादनुत्तमसुखलाभः ।

४३. कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः ।

४४. स्वाध्यायादिष्टदेवतासम्प्रयोगः ।

४५. समाधिसिद्धिरीश्वरप्रणिधानात् ।

४६. स्थिरसुखमासनम् ।

४७. प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम् ।

४८. ततो द्वन्द्वानभिघातः ।

४९. तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः।

५०. बाह्याभ्यन्तरस्तम्भवृत्तिर्देशकालसंख्याभिः परिदृष्टो दीर्घसूक्ष्मः।

५१. बाह्याभ्यन्तरविषयाक्षेपी चतुर्थः ।

५२. ततः क्षीयते प्रकाशावरणम् ।

५३. धारणासु च योग्यता मनसः ।

५४. स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः ।



५५. ततः परमा वश्यतेन्द्रियाणाम् ।

इति द्वितीयः साधनपादः

□ □ □



## तृतीयो विभूतिपादः

१. देशबन्धश्चित्तस्य धारणा ।

२. तत्र प्रत्ययैकतानता ध्यानम् ।

३. तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ।

४. त्रयमेकत्र संयमः ।

५. तज्जयात् प्रज्ञालोकः ।

६. तस्य भूमिषु विनियोगः ।

७. त्रयमन्तरङ्गं पूर्वेभ्यः ।

८. तदपि बहिरङ्गं निर्बीजस्य ।



९. व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ - निरोधक्षण-चित्तान्वयो निरोधपरिणामः ।

१०. तस्य प्रशान्तवाहिता संस्कारात् ।

११. सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधि-परिणामः ।

१२. ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः ।

१३. एतेन भूतेन्द्रियेषु धर्मलक्षणावस्थापरिणामा व्याख्याताः ।

१४. शान्तोदिताव्यपदेश्यधर्मानुपाती धर्मी ।

१५. क्रमान्यत्वं परिणामान्यत्वे हेतुः ।

१६. परिणामत्रयसंयमादतीतानागतज्ञानम् ।
१७. शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्र विभाग-
संयमात्सर्वभूतरुतज्ञानम् ।
१८. संस्कारसाक्षात्करणात्पूर्वजातिज्ञानम् ।
१९. प्रत्ययस्य परचित्तज्ञानम् ।
२०. न च तत्सालम्बनं तस्याविषयीभूतत्वात् ।
२१. कायरूपसंयमात् तद्ग्राह्यशक्तिस्तम्भे चक्षुष्प्रकाशा-
ऽसम्प्रयोगेऽन्तर्धानम् ।
२२. सोपक्रमं निरुपक्रमं च कर्म तत्संयमादपरान्तज्ञानम-



रिष्टेभ्यो वा ।
२३. मैत्र्यादिषु बलानि ।
२४. बलेषु हस्तिबलादीनि ।
२५. प्रवृत्त्यालोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्ट-ज्ञानम्।
२६. भुवनज्ञानं सूर्ये संयमात् ।
२७. चन्द्रे ताराव्यूहज्ञानम् ।
२८. ध्रुवे तद्गतिज्ञानम् ।
२९. नाभिचक्रे कायव्यूहज्ञानम् ।
३०. कण्ठकूपे क्षुत्पिपासानिवृत्तिः ।



३१. कूर्मनाड्यां स्थैर्यम् ।
३२. मूर्धज्योतिषि सिद्धदर्शनम् ।
३३. प्रातिभाद् वा सर्वम् ।
३४. हृदये चित्तसंवित् ।
३५. सत्त्वपुरुषयोरत्यन्तासंकीर्णयोः प्रत्ययाविशेषो भोगः
परार्थत्वात् स्वार्थसंयमात्पुरुषज्ञानम् ।
३६. ततः प्रातिभश्रावणवेदनादर्शास्वादवार्ता जायन्ते ।
३७. ते समाधावुपसर्गा व्युत्थाने सिद्धयः ।
३८. बन्धकारणशैथिल्यात् प्रचारसंवेदनाच्च चित्तस्य



परशरीरावेशः ।
३९. उदानजयाज्जलपङ्ककण्टकादिष्वसङ्ग उत्क्रान्तिश्च ।
४०. समानजयाज्ज्वलनम् ।
४१. श्रोत्राकाशयोः सम्बन्धसंयमाद्दिव्यं श्रोत्रम् ।
४२. कायाकाशयोः सम्बन्धसंयमाल्लघुतूलसमापत्तेश्चाकाशगमनम् ।
४३. बहिरकल्पितावृत्तिर्महाविदेहा ततः प्रकाशा-वरणक्षयः ।
४४. स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद् भूतजयः ।
४५. ततोऽणिमादिप्रादुर्भावः कायसम्पत्तद्धर्मानभिघातश्च ।
४६. रूपलावण्यबलवज्रसंहननत्वानि कायसम्पत् ।

४७. ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमाद् इन्द्रिय-जयः ।

४८. ततो मनोजवित्वं विकरणभावः प्रधानजयश्च ।

४९. सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्व-ज्ञातृत्वं च ।

५०. तद्वैराग्यादपि दोषबीजक्षये कैवल्यम् ।

५१. स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणं पुनरनिष्टप्रसङ्गात् ।

५२. क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानम् ।

५३. जातिलक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः ।



५४. तारकं सर्वविषयं सर्वथा विषयमक्रमं चेति विवेकजं ज्ञानम् ।

५५. सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति ।

इति तृतीयो विभूतिपादः

□ □ □



## चतुर्थः कैवल्यपादः

१. जन्मौषधिमन्त्रतपःसमाधिजाः सिद्धयः ।

२. जात्यन्तरपरिणामः प्रकृत्यापूरात् ।

३. निमित्तमप्रयोजकं प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् ।

४. निर्माणचित्तान्यस्मितामात्रात् ।

५. प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषाम् ।

६. तत्र ध्यानजमनाशयम् ।

७. कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम् ।



८. ततस्तद्विपाकानुगुणानामेवाभिव्यक्तिर्वासनानाम् ।

९. जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेक-रूपत्वात् ।

१०. तासामनादित्वं चाशिषो नित्यत्वात् ।

११. हेतुफलाश्रयालम्बनैः संगृहीतत्वादेषामभावे तदभावः ।

१२. अतीतानागतं स्वरूपतोऽस्त्यध्वभेदाद् धर्माणाम् ।

१३. ते व्यक्तसूक्ष्मा गुणात्मानः ।

१४. परिणामैकत्वाद्वस्तुतत्त्वम् ।

१५. वस्तुसाम्ये चित्तभेदात्तयोर्विभक्तः पन्थाः ।

१६. न चैकचित्ततन्त्रं वस्तु तदप्रमाणकं तदा किं स्यात् ।

१७. तदुपरागापेक्षित्वाच्चित्तस्य वस्तु ज्ञाताऽज्ञातम् ।

१८. सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात् ।

१९. न तत्स्वाभासं दृश्यत्वात् ।

२०. एकसमये चोभयानवधारणम् ।

२१. चित्तान्तरदृश्ये बुद्धिबुद्धेरतिप्रसङ्गः स्मृतिसंकरश्च ।

२२. चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनम् ।



२३. द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थम् ।

२४. तदसंख्येयवासनाभिश्चित्रमपि परार्थं संहत्यकारित्वात् ।

२५. विशेषदर्शिन आत्मभावभावनाविनिवृत्तिः ।

२६. तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तम् ।

२७. तच्छिद्रेषु प्रत्ययान्तराणि संस्कारेभ्यः ।

२८. हानमेषां क्लेशवदुक्तम् ।

२९. प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः
समाधिः ।



३०. ततः क्लेशकर्मनिवृत्तिः ।

३१. तदा सर्वावरणमलापेतस्य ज्ञानस्या-नन्त्याज्ज्ञेयमल्पम् ।

३२. ततः कृतार्थानां परिणामक्रमसमाप्तिर्गुणानाम् ।

३३. क्षणप्रतियोगी परिणामापरान्तनिर्ग्राह्यः क्रमः ।

३४. पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा
वा चितिशक्तिरिति ।

इति चतुर्थः कैवल्यपादः

□ □ □



